श्रीः

# वेदोपनिषत्सु गायत्री (शक्तिः)

**डा. ए.वि. नागसम्पिगे**

निदेशकः, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गळूरु

'पराऽस्य शक्तिः विविधैव श्रूयते स्वभाविकी ज्ञानबलक्रिया च' इति 'एकं सत् विप्रा बहुधा वदन्ति' इति श्रुत्युक्तदिशा च शक्तिरेव नानाविधैः शब्दैः वेदोपनिषत्सु प्रस्तूयते । एकमेव परमं तत्त्वं नानाविधैः शब्दैः व्यपदिश्यत इति विज्ञेयम् । ज्ञानरूपा बलरूपा च या शक्तिः सा एव गायत्रीपदेन वेदोपनिषसत्सु व्याहृता समेषां अनुग्रहाय भवतीति निश्चप्रचम् ।

## वेदेषु उपनिषत्सु च गायत्री

ऋग्वेदे शाकलसंहितायां(३.६२.१०), शुक्लयजुर्वेदे माद्यन्दिनसंहितायाम् (३.३३, २२.९, ३०.२, ३६.३) एवं कृष्णयजुर्वेदतैत्तिरीयसंहितायां (१.५.६.४, ४.१.११.१) तथा कृष्णयजुर्वेदमैत्रायणीयसंहितायां (४.१०.७७), सामवेदीयगौतमसंहितायां उत्तरार्चिके (१३.३.३) तथा (१३.४.३.१), अथर्ववेदसंहितायां शौनकीये (१९.७१.१) स्थलेषु गायत्र्याः शक्तिः विशिष्टया शैल्या निरूपिता विद्यते । **शुक्लयजुर्वेदे** 'ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोचयात्' इति (३६.३) गायत्र्याः स्वरूपं निपुणतरं उपपादितम् । एवं ऐतरेयब्राह्मणे **'ब्रह्म वै गायत्री'** (३.३.१०) इति ऐतरेयारण्यके 'ब्रह्म वै गायत्री' (१.५.१) इति छान्दोग्ये **'वाग् वै गायत्री'** (३.१२.१) इति च 'गायत्र्याः महिमा प्रतिपादिता न विस्मरणीया ।

यद्यपि गायत्री, ब्रह्मगायत्री, विश्वामित्रगायत्रीभेदेन द्विविधा । आद्या ओङ्कारव्याहृतिरहिता । द्वितीया ओङ्कारव्याहृतिसहिता इति भेदः ।

## गायत्रीनिर्वचनम्

'सा हैषा गयांस्तत्रे । प्राणावै गयाः तत्प्राणांस्तत्रे तद्गयांस्तत्रे तस्मात् गायत्रीनाम' (शतपथब्राह्मणम् - १४.८.१५.७) अयमर्थः — यः गायति तं जनं त्रायतीति हेतोः जगद्रक्षणार्थमेव आविष्कृता शक्तिरियं गायत्रीशब्देन व्यपदिष्टा । उक्तं च बृहद्योगियाज्ञवल्क्यस्मृतौ- **गायन्तं त्रायते यस्मात् गायत्रीति ततः स्मृता** (४.३५)।

गानकर्तुः पापत्राणनिमित्तं इयं गयत्रीशब्देन व्यपदिष्टेति शिवपुराणे श्रूयते —

**'गायन्तं त्रायते पापात् गात्रयीत्युच्यते हि सा'** (शिव.पु. १५.१६)

उक्तोऽयमर्थः देवीभागवतेऽपि- **'गायन्तं त्रायते यस्मात् गायत्रीत्यभिधीयते'**(११.३.११) ।

## गायत्रीमन्त्रार्थः

'ॐ' = गुणपूर्णः, 'भूः' = बहुरूपः, 'भुवः' = भूत्या वरः, 'स्वः' = अनन्तसुखरूपः,

'तत्' = विश्वव्याप्तः, 'सवितुः' = जगतः जनकः, 'वरेण्यं' = गुणोन्नतेः सर्वैर्भजनीयः, 'भर्गः' = प्रकाशप्रमोदरूपः, एवंविधस्य 'देवस्य' = क्रीडादिगुणविशिष्टस्य, परमात्मनः रूपं 'धीमहि' = ध्यायेम, 'धियो यो नः प्रचोदयात्' = सः अस्मान् समीचीने मार्गे प्रेरयतु । अथवा यः नः धियः प्रचोदयात् सः अनन्तगुणः एवं गुणविशेषणविशिष्ट इति वा योजना ध्येया ।

**गायत्र्याः नामानि**

पूर्वाह्णे गायत्रीति, मध्यंदिने सवित्रीति, सायाह्णे च सरस्वतीति त्रिधैव एका शक्तिः व्यपदिश्यते । तदुक्तं-

'गायत्रीनाम पूर्वाह्णे सावित्री मध्यमे दिने ।
सरस्वती च सायाह्णे सा एव सन्ध्या त्रिषु स्मृता ।'

उक्तोऽयमर्थः त्रिपुरतापिन्युपनिषदि-

'गायत्री प्रातः, सवित्री मध्यन्दिने, सवरस्वती सायम्' इति ।

**त्रिरूपा गायत्री**

तत्र गायत्री ब्रह्मरूपा भवति । सावित्री विष्णुरूपिणी, सरस्वती रुद्ररूपा भवति । एवं त्रिरूपा शक्तिः उपास्या भवति । तदुक्तम्–

**गायत्री ब्रह्मरूपा स्यात् सवित्री विष्णुरूपिणी ।**
**सरस्वती रुद्ररूपा च उपास्या मूर्तिभेदतः ।।** इति ।

**गायत्रीमन्त्रस्य ध्येयं रूपम्**

श्रीमन्मध्वाचार्याः द्वैतसम्प्रदायप्रवर्तकाः गायत्र्याः ध्येयः भगवान् विष्णुरिति नरसिंहपुराणसमाख्यया स्वाशयं प्रत्यपीपदम् । पुराणोक्तः ध्यानश्लोकः एवं प्रचकास्ति -

**ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः ।**
**केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुः धृतशङ्खचक्रः ।।** इति ।

अत्र ध्येयरूपं पुराणेषु अनेधा निरुक्तं विज्ञेयम् । स्त्रीरूपा शक्तिः अत्र ध्येया इति देविभागवतादिषु श्रूयते । यद्यपि स्त्रीरूपो विष्णुरपि गायत्रीप्रतिपाद्य इति मध्वाचार्या वदन्ति । तथापि जपकाले सवितृमण्डलमध्यवर्ती विष्णुरेव ध्येयः ।

**शाक्तास्तु आदिशक्तिः(स्त्री) गायत्रीजपे उपास्या** इति प्रतिपादयन्ति -

'तस्मात्सर्वे द्विजाः शाक्ता, न शैवा न च वैष्णवाः ।
आदिशक्तिमुपासन्ते गायत्रीं वेदमातरम् ।।' इति ।

रक्त-श्वेत-पीत-नील-धवलवर्णयुक्तमुखैः सम्पन्ना त्रिनेत्रा देदीप्यमाना रक्तवर्ण रक्तकमल-

मालाधारिणी मणिगणविभूषिता कमलासने राजमाना चतुर्भुजेषु कुण्डकमल अक्षमालावरस्रजविभूषिता हंसाधिरूढा कुमारी (गायत्री) ध्येया इति पुराणेषु निरूपितम् । तदुक्तम्-

रक्तश्वेतहिरण्यनीलधवलैर्युक्तां त्रिनेत्रोज्वलां
रक्तां रक्तनवस्रजं मणिगणैर्युक्तां कुमारीमिमाम् ।
गायत्रीं कमलासनां करतलव्यानद्धकुण्डाम्बुजां
पद्माक्षीं च वरस्रजं च दधतीं हंसाधिरढां भजे ।। (देवीभागवतम् - १२.६.९)

**गायत्र्याः असाधारणामहिमा**

वेदत्रयात् चतुर्मुखः अकार-उकार-मकारान् भूभुर्वःस्वः इति व्याहृतयश्च निरदुहत् । त्रिभ्यः वेदेभ्यः पादत्रयं च अदुहत् । तदुक्तं मनुस्मृतौ -

'अकारं चाप्युकारं च मकारं च प्रजापतिः ।
वेदत्रयात् निरुदहत् भूर्भुवःस्वरितीति च ।।' (मनु.स्मृ.२.७६)

त्रिभ्यः एव तु वेदेभ्यः पादं पादमदूदुहत् ।
तदित्र्युचोऽस्याः सवित्र्याः परमेष्ठी प्रजापतिः ।
त्रिपदा चैव गायत्री विज्ञेयं ब्रह्मणो मुखम् । (मनु.स्मृ. २.८१)

**गायत्री वा इदँ सर्वम्**

नृसिंहपूर्वतापनीयोपनिषदि गायत्र्याः महत्वं स्फुटमुपपादितम् - **'गायत्री वा इदँ सर्वम्'** । सर्वोऽपि वाङ्मयप्रपञ्चः गायत्रीव्याख्यानरूप एव । तदुक्तम्-

**'गायत्रीवा इदं सर्वं भूतं यदिदं किञ्च । वाग्वैगायत्री । वाग्वा इदं सर्वं भूतम् । गायति त्रायते च'** - (छा.उ.३.१२.१)

विवृतोऽयमर्थः बृहद्योगियाज्ञवल्क्यस्मृतौ -

**'गायत्री वा इदं सर्वं ब्रह्माण्डं ब्राह्मणानि तु ।**
**वेदोपनिषत्शाखासु ब्राह्मणानि विजानतः ।।**

**पुराणधर्मशास्त्राणि गायत्र्याः पावनानि तु ।**
**कीर्तितानि त्वनेकानि गायत्र्याः पावनानि च ।।'** (४.७)

चतुर्वेदाः गायत्री च ब्रह्मणा पुरा तोलिताः । तदा गायत्री सर्वतो वरा गरीयसी स्वं रूपं प्रदर्शयामास । उक्तोऽयमर्थः पद्मपुराणे -

**'चतुर्वेदाश्च गायत्री पुरा वै तुलिता मया ।**
**चतुर्वेदात् परा गुर्वी गायत्री मोक्षदा स्मृता ।।'**

**गायत्री सर्वतोऽधिका**

विचारशास्त्रात्मिका पूर्वापरमीमांसा विद्यासु गरीयसी । ततोऽपि तर्कशास्त्रं गरीयः । ततः पुराणानि श्रेष्ठानि । तेभ्यः धर्मशास्त्राणि । ततः श्रुतिः भगवती । ततोऽपि उपनिषत् श्रेष्ठा । ततोऽपि अधिका गायत्री मता । एवञ्च गायत्री सर्वाधिका मता । उक्तोऽयमर्थः स्कान्दे काशीखण्डे (९.४९)-

**अष्टादशसु विद्यासु मीमांसातिगरीयसी ।**
**ततोऽपि तर्कशास्त्राणि पुराणं तेभ्य एव च ।**
**ततोऽपि धर्माशास्त्राणि तेभ्यो गुर्वी श्रुतिर्द्विज ।**
**ततोऽप्युनिषद् श्रेष्ठा गायत्री च ततोऽधिका ।**

**उक्तोऽयमर्थः विश्वामित्रेणापि-**

**तदित्यृचः समो नास्ति मन्त्रो वेदचतुष्टये ।**
**सर्वे वेदाश्च यज्ञाश्च दानानि च तपांसि च ।**
**समानि कलया प्राहुर्मुनयो न तदित्यृचः ।**
**बहुना किमिहोक्तेन यथावत्साधुसाधिता ।**
**द्विजन्मनामियं विद्या सिद्धिकामदुघा मता ।**

**सर्वत्र गेगीयमाना गायत्री**

गायत्र्याः महिमा सर्वेषु वेदेषु सर्वासु उपनिषत्सु पुराणेषु स्मृतिषु च विस्तरेणोपवर्णिता । अत्र इमानि प्रमाणानि विद्वद्भिः अनुसन्धेयानि-

१. स्तुता मया वरदा वेदमाता पचोदयन्तां पावमानी द्विजानाम् ।
आयुः प्राणं प्रजां पशुं कीर्तिं द्रविणं ब्रह्मवर्चसं मह्यं दत्वा व्रजतं ब्रह्मलोकम् ।
(अथर्ववेद.१९.७१.१)

२. गायत्री वा इदँ सर्वं भूतं यदिदं किञ्च वाग्वै गायत्री ।
वाग्वा इदं सर्वं भूतं गायति त्रायते च । (छा.उ. ३.१२.१)

३. न गायत्रीसमो मन्त्रः । (स्कन्दपुराण.काशीखण्ड. ६.८२)
४. न गायत्र्याः परं परम् । (भारद्वाजस्मृतिः १२.४२)
५. न गायत्र्याः परो मन्त्रः । (चाणक्यनीतिः)
६. गायत्री परमो मन्त्रः । (अग्निपुराणम्. २८४.२)
७. गायत्र्यास्तु परं नास्ति । (देवीभागवतम् ११.३.१०, ११.२१.३६)
८. सावित्र्यास्तु परं नास्ति । (अग्निपुराणम् २१५.५)
९. सावित्र्यास्तु परं नास्ति । (मनुस्मृतिः - २.८३)
१०. सावित्र्यास्तु परं नास्ति । (बृहद्योगियाज्ञवल्क्यस्मृतिः २.६३)

११. गायत्र्यतिगरीयसी । (बृहत्पाराशरस्मृतिः ५.१६)
१२. गायत्री चतुर्विंशत्याक्षरा त्रिपदा षट्कुक्षिः पञ्चशीर्षा.. (महाना.उ. ११.७)
१३. गायत्री छन्दसामहम् (भ.गी.१०.२५)
१४. गायत्री छान्दसां मातेदं ब्रह्म जुषस्व मे (महाना.उ. ११.६)
१५. गायत्री प्रातः, सावित्री मध्यंदिने सरस्वती सायमिति निरन्तरमजपा.. (त्रि.ता.४.७)
१६. गायत्रीमावाहयामि सावित्रीमावाहयामि सरस्वतीमावाहयामि (महाना.११.७)
१७. गायत्रीमेव सावित्रीमनुब्रूयात् (गायत्र्यु.४)
१८. गायत्र्याः सावित्र्यभवत् । सावित्र्याः सरस्वत्यभवत् । सरस्वत्याः सर्वे वेदा अभवन् (गायत्रीर.१)

**सर्वपापप्रायश्चित्तरूपा गायत्री**

सर्वपापविनशनशक्तिः गायत्र्याः विद्यत इति सर्वाणि पुराणानि प्रतिपादयन्ति । गायत्र्याः सकृत्जपात् तत्तदिनपापं नश्यति । दशवारजपेन दिवानिशं चरितं पापं नश्यति । मासार्जितं च पापं शतवारजपेन नश्यति । वत्सरार्जितं पापं सहस्रगायत्रीजपेन नश्यति । तत्तज्जन्मकृतं पापं लक्षगायत्र्या विनश्यति । सर्वजन्मकृतं पापं शतलक्षगायत्रीमन्त्रजपेन विनश्यति । तदुक्तं-

**'सकृज्जपश्च गायत्र्याः पापं दिनभवं हरेत् ।**
**दशवारजपेनैव नश्येत्यापं दिवानिशम् ।।**
**शतवारं जपश्चैव पापं मासार्जितं हरेत् ।**
**सहस्रधा जपश्चैव कल्मषं वत्सरार्जितम् ।।**
**लक्षो जन्मकृतं पापं दशलक्षोऽन्यजन्मजम् ।।**
**सर्वजन्मकृतं पापं शतलक्षाद् विनश्यति ।।**
**करोति मुक्तिं विप्राणां जपो दशगुणस्ततः ।।'** (देवीभागवतम् -६.२६.१४-१७)

जनाः नानाविधानि पापानि चरन्तीति निश्चप्रचम् । चरितानां सर्वविधपापानां सङ्करे तत्प्रायश्चित्तरूपेण दशसहस्रवारं गायत्रीजपकरणं प्रायश्चित्तरूपं भवतीति भगवान् पाराशरः प्रत्यपीपदत् । (**पाराशरस्मृतिः** - ११.५३)

'सर्वेषामेव पापानां सङ्करे समुपस्थिते ।
दशसाहस्रमभ्यस्य गायत्रीशोधनं परम् ।।'

**उपनिषदि गायत्र्याः महिमा**

समग्रोऽपि वाङ्मयप्रपञ्चः गायत्रीव्याख्यानरूप इति गायत्र्युपनिषत् प्रतिपादयति । तथाहि तद्वचनानि । तदुक्तम् — **आत्मन आकाशो भवति, आकाशाद् वायुर्भवति, वायोरग्निर्भवति, अग्नेरोङ्कारो भवति, ॐकाराद् व्याहृतिर्भवति, व्याहृत्या गायत्री भवति, गायत्र्याः सावित्री भवति, सावित्र्याः सरस्वती भवति, सरस्वत्या वेदा भवन्ति, वेदेभ्यो ब्रह्मा भवति, ब्रह्मणो**

**लोका भवन्ति, तस्माल्लोकाः प्रवर्तन्ते, चत्वारो वेदा साङ्गाः सोपनिषदः सेतिहासास्ते सर्वे गायत्र्याः प्रवर्तन्ते ।**

यथा देवानां मध्ये अग्निः श्रेष्ठः, मनुष्याणां च ब्राह्मणः, शिखरिणां मेरुः, स्रोतसां गङ्गा, ऋतूनां वसन्तः, प्रजापतीनां ब्रह्मा, तथा गायत्री सर्वतो वरा भवति । तदुक्तम् -

**अग्निर्देवानां ब्राह्मणो मनुष्याणां मेरुः शिखरिणां गङ्गा नदीनां वसन्तः ऋतूनां ब्रह्मा प्रजापतीनामेवाऽसौ मुख्यः गायत्र्या गायत्र्या गायत्रीछन्दो भवति ।**

**गायत्री त्रिपदा पञ्चशीर्षा षट्कुक्षिः**

ऋगादयः त्रयो वेदाः पादाः भवन्ति गायत्र्याः । पूर्वादयश्चत्वारः दिशः, उर्ध्वाधरदिशः षट्कुक्षिस्थानीयाः, व्याकरणादीनि अङ्गानि पञ्चशीर्षाणि । तदुक्तम्-

**ऋग्वेदोऽस्याः प्रथमः पादो भवति, यजुर्वेदो द्वितीयः, सामवेदस्तृतीयः, पूर्वा दिक्प्रथमा कुक्षिर्भवति, दक्षिणा द्वितीया, पश्चिमा तृतीया, उदीची चतुर्थी, ऊर्ध्वा पञ्चमी, अधरा षष्ठी कुक्षिः । व्याकरणमस्याः प्रथमं शीर्षं भवति, शिक्षा द्वितीयं, कल्पस्तृतीयं, निरुक्तं चतुर्थं, ज्योतिषामयनं पञ्चमम् ।**

**गायत्रीजपसम्प्रदायप्रवर्तकाः**

अमी महान्तः गायत्रीजपसम्प्रदायप्रवर्तकाः इति भगवती गायत्र्युपनिषदाह । प्रह्लादः, अत्रिः, वशिष्ठः, शकः, पराशरः, कण्वः, विश्वामित्रः, कपिलः, शौनकः, याज्ञवल्क्यः अन्ये च ऋषयः देवाः राजानश्च गायत्रीजपेन अतुलां सिद्धिमापुः । तदुक्तम्-

प्रह्लादोऽत्रिर्वशिष्ठश्च शकः कण्वः पराशरः ।
विश्वामित्रो महातेजाः कपिलः शौनको महान् ।
याज्ञवल्क्यो भरद्वाजो जमदग्निस्तपोनिधिः ।
गौतमो मुद्गलः श्रेष्ठो वेदव्यासश्च लोमशः ।।
अगस्त्यः कौशिको वत्सः पुलस्त्यो माण्डुकस्तथा ।
दुर्वासास्तपसा श्रेष्ठो नारदः कश्यपस्तथा ।।

एवं गायत्र्याः महिमा वेदेषु पुराणादिषु च विस्तरेणोपवर्णिता सुजनैरनुसन्धेया ।

******

## उदाहृतग्रन्थाः

१. ऋग्वेदशाकलसंहिता

२. शुक्लयजुर्वेदमाध्यन्दिनसंहिता

३. कृष्णयजुर्वेदतैत्तिरीयसंहिता

४. कृष्णयजुर्वेदमैत्रायणीयसंहिता

५. सामवेदीयगौतमसंहिता

६. ऐतरेयब्राह्मणम्

७. ऐतरेयारण्यकम्

८. छान्दोग्योपनिषद्

९. शतपथब्राह्मणम्

१०. बृहद्योगियाज्ञवल्क्यस्मृतिः

११. शिवपुराणम्

१२. देवीभागवतम्

१३. त्रिपुरतापिन्युपनिषद्

१४. मनुस्मृतिः

१५. नृसिंहपूर्वतापनीयोपनिषद्

१६. पद्मपुराणम्

१७. स्कान्दपुराणम् (काशीखण्डम्)

१८. अथर्ववेदः

१९. भारद्वाजस्मृतिः

२०. अग्निपुराणम्

२१. बृहत्पाराशरस्मृतिः

२२. महानारायणोपनिषद्

२३. भगवद्गीता

२४. पाराशरस्मृतिः